## READING

॥ श्रीरामस्य चरितम् ॥

अस्ति नृपो दशरथो नाम । सो ऽतीव धार्मिको भूमिपः सुखं जीवति । नृपस्य दुःखं नास्तीति भाषन्ते जनाः । एकदा दशरथो वनं गच्छति । तस्मिन्वने* ब्राह्मणस्य पुत्रो वसति । अहो सुन्दरं मृगं पश्याम्यहमिति चिन्तयति नृपः । बालकं च तीक्ष्णेन शरेण हन्ति । ब्राह्मण आगच्छति हतं पुत्रं पश्यति च । सो ऽतीव कुपितो भवति । नृपं च शपति । हे मूर्ख । त्वं किमिति मम पुत्रं हंसि । तव दुष्कृतेनाहं दुःखमनुभवामि । पुत्रेण विना न जीवामि । त्वमप्यहमिव पुत्राच्छोकमनुभवसीति । नृपो वदति । हा हा नश्यामीति । शोकेन पीडितो गृहं गच्छति ॥

---

* See 5.5